National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 58-60
© 2025 NJHSR
www.sanskritarticle.com

**Dr. Apurba Gorai**
Assistant Professor,
Dept. of Sanskrit,
Mahatma Gandhi College,
Lalpur

**Correspondence:**
**Dr. Apurba Gorai**
Assistant Professor,
Dept. of Sanskrit,
Mahatma Gandhi College,
Lalpur

# वेदान्तपरम्परायां अचिन्त्यभेदाभेदवादे गोविन्दभाष्यस्य महत्वम्

**Dr. Apurba Gorai**

भारतीयदर्शनानि स्थूलरुपेण द्विधा विभज्यन्ते - आस्तिकदर्शननानि, नास्तिकदर्शनानि च। आस्तिकदर्शनेषु वेदान्तदर्शनं भारतदेशस्य प्राणभूतम् आध्यात्मिक-चिन्तनस्य अखिल-सनातनधर्मस्य च मूलम् प्रदिप्तमुकुटमणिस्वरुपञ्च। वेदान्तदर्शनं हि भारतीयाध्यात्मशास्त्रस्य चरमो विकासः। वेदान्तशब्दः विद् धातोः घञ् प्रत्ययेन निष्पद्यते। वेदस्यवेदानां वा अन्तः अर्थात् उपनिषदेव वेदान्तः। वेदस्य रहस्यात्मकसिद्धान्तप्रतिपादकत्वेन उपनिषदि वेदान्त-शव्दप्रयोग उपलभ्यते। 'अन्तः' शब्दःनिर्णयार्थे प्रयुक्तः। मुक्तिकोपनिषदि वेदान्तविषये निगद्यते -

**तिलेषु तैलवत् वेदे वेदान्ताः सुप्रतिष्ठिताः।**[1]

उपनिषदि वेदस्य सार एव वर्ण्यते । वेदान्तदर्शनम् उत्तरमिमांसा इति नाम्ना प्रसिद्धम् । पश्चादुपनिषत्सु प्रतीयमानविरोधपरिहाराय तथ्यानामेकवाक्यतायै च भगवता व्यासेन विरचितं ब्रह्मसूत्रमेवोप-निषन्मूलकत्त्वाद् वेदान्तसूत्रं नाम्ना प्रसिद्धम्। उपनिषदां सारो हि श्रीमद्भगवद्गीता। उपनिषद्-ब्रह्मसूत्र-गीतेति त्रयो ग्रन्थाश्च प्रस्थानत्रयीति नाम्ना ख्यातिं प्राप्ताः। दर्शनस्यैतस्य प्रणेता वेदानां विभागकर्ता भगवान् कृष्णद्वैपायनव्यासो वर्तते। स वेदान्तदर्शनस्य गर्भस्वरूपं वेदान्तसूत्रस्य प्रणेता इति अङ्गीक्रियते। वेदान्तदर्शने भगवतो बादरायणस्य ब्रह्मसूत्रमस्ति प्रशस्तं ग्रन्थरत्नम् । चैतन्यदेवः स्वग्रन्थे चैतन्यचरितामृते वेदान्तसूत्रविषये उक्तं यत्, भगवान् श्रीनारायणः स्वयं व्यासरूपेण अवतारं कृत्वा वेदान्तसूत्रं प्रकाशितवान्।-

**प्रभु कहे, वेदान्तसूत्र ईश्वरवचन।**

**व्यास रूपे कैल ताहा श्रीनारायण।**[2]

गीतायामपि प्राप्यते-

**वेदान्तकृद्वेदविदेव चाहम् ।**[3]

वेदान्तसूत्रं ब्रह्मसूत्रं ब्रह्ममीमांसा च इत्याख्यातम्। इदं चतुर्षु अध्यायेषु विभक्तम् । अध्यायाश्चास्य चतुर्षु पादेषु विभक्ताः। अध्यायाणां नामानि क्रमशः उल्लिखितम्, यथा - समन्वयाध्यायः, अविरोधाध्यायः, साधनाध्यायः, फलाध्यायः।

भगवत्पादः शङ्कराचार्यः ब्रह्मसूत्रमधिकृत्य शारीरकमीमांसाभाष्यं रचितवान्। तत्पश्चात् अनेके आचार्याः वहुविधानि भाष्याणि प्रणीतवन्तः। भाष्यभेदेन चिन्तनभेदेन च भाष्यकाराः विभिन्नसम्प्रदायान् स्थापितवन्तः। यथा- शङ्कराचार्यस्य अद्वैतवादः (शारीरकमीमांसाभाष्यम्), भास्कराचार्यस्य औपाधिक-भेदाभेदवादः (भास्करभाष्यम्), रामानुजाचार्यस्य विशिष्टाद्वैतवादः (श्रीभाष्यम्), निम्बार्काचार्यस्य स्वाभाविक- भेदाभेदवादः (वेदान्तपारिजातसैरभ-भाष्यम्), मध्वाचार्यस्य द्वैतवादः (पूर्णप्रज्ञभाष्यम्), वल्लभाचार्यस्य शुद्धाद्वैतवादः (अणुभाष्यम्), श्रीकृष्ण-चैतन्यदेवस्य अचिन्त्यभेदाभेदवादः ।

भेदाभेदसम्प्रदाये द्वैतसम्प्रदाये च चैतन्यसम्प्रदायस्य च किञ्चित्मतसाधर्म्यं प्राप्यते, न तु सर्वम्। वेदान्ते भेदाभेदवादस्य प्रवर्तकः श्रीभास्कराचार्य आसीत्। अस्य ख्यातिःबादरायण ब्रह्मसूत्रस्य भास्करभाष्यरचनया विद्यते। भारतीयदर्शने भेदाभेदसिद्धान्तो नितान्तं प्राचीनः। भेदाभेदवादः न केवलं भास्करस्यैव अपितु ब्रह्मकर्तुः बादरायणादपि प्रागेव औडुलौमेः आश्मरथ्यस्य च मतम् आसीत्। आचार्याश्मरथ्यमतेन कारणात्मना जीवब्रह्मणोरैक्यं प्रतिपाद्यते, परन्तु कार्यात्मना द्वयोरनैक्यं जागर्ति । यथा कारणात्मना सुवर्णस्य ऐक्य-भावापन्नेऽपि कटककुण्डलादिकार्यरूपेण समाधेया। स तु जीवब्रह्मणो-रैक्यानैक्य-विषयेऽवस्थाविशेषमेव नियामकत्वेन हेतुभूतं मनुते। संसारदशायां चैतन्यरूपस्यैकत्वात् चैतन्यरूपाणां ब्रह्मणश्चाभेदो नितरां सुसम्पन्नः। अपर आचार्यः भतृप्रपञ्चोऽपि भेदाभेद-वादप्रतिपादकः। तेनानुसारेण परमार्थस्त्वेकरूपोऽपि भवति। नानारूपोऽपि भवति, ब्रह्मरूपेण एको जीवरूपेण नाना । परमात्मन एकदेशमात्रं जीवो नाना ।

कामवासनादिजीवधर्माणां नानात्वाद् धर्मभेदात् दृष्टिभेदाच्च। जीवस्य नानात्वं न औपाधिकम्, अपितु वास्तविकमेव। भर्तृप्रपञ्चमते ब्रह्मणःपरिणामोऽपि सम्पद्यते। साधनपक्षेऽयमाचार्यो ज्ञानकर्मसमुच्चय-वादी वर्तते। कर्मजन्यं फलं त्वनित्यमिति ध्रुवम्। परन्तु ज्ञानद्वारा विमलीभूतेन कर्मणा आत्यन्तिक श्रेय उपलब्धुं नूनं पार्यते। अपरपरमोक्षरूपेण च मोक्षस्य द्वैविध्यं मनुतेऽयमाचार्यः। परन्तु चैतन्यसम्प्रदाये भेदाभेदः अचिन्त्यं, न तु औपाधिकम् ।

द्वैतवेदान्तस्य प्रवर्तकःआनन्दतीर्थः, तस्य अपरःनाम मध्वयतिः। तस्य कालः 1300 ख्रीष्टाब्दे मन्यते । तस्य पिता श्रीमध्यगेह माता च वेदवती । द्वैतवादिनः भेदवादिरूपेण प्रसिद्धाः। भेदस्तु पञ्चधा स्यात्। जीवेश्वरयोः, जडेश्वरयोः, जडजीवयोः, जडजडयोः, जीवजीवयोश्च भेदाः। विष्णुः परमात्मा उपास्यः। स च सर्वशक्तिमान् दिव्य-शरीरधारी, चतुर्बाहु, सत्यज्ञानानन्द-स्वरूपात्मकः। सर्वेषां वेदानां सर्वपदानां च मुख्यया वृत्त्या प्रतिपाद्यः। जगतः जन्मस्थितिलय हेतुश्च। लक्ष्मी तस्य परा शक्तिः वर्तते। एषा परमात्माधीना प्रकृतिः नित्याऽक्षरात्मिका । ब्रह्मादयः सर्वे जीवाः सन्ति । जीवाः अज्ञान-मोह-दःख-द्वेषादिकदोषसंचयप्रायाः। जीवपरमात्मनः सेव्यसेवकसम्वन्ध स्वीकरोति। श्रीमध्वसम्प्रदाये यत् सच्चिदानन्द-ईश्वरस्य स्वरूपं विग्रहश्च वर्णितम्, तत् चैतन्यसम्प्रदायस्य मूलम्। अतः हि चैतन्यमहाप्रभुः मध्वसम्प्रदायस्य मतं स्वीकृतवान्। परन्तु ईश्वरसेवाकर्मे किञ्चित् वैविध्यमासीत् ।

श्रीचैतन्यदेवस्य वेदान्तविषयकं मतमचिन्त्यभेदाभेदवादः इति नाम्ना प्रसिद्धम् ।स अचिन्त्यभेदाभेदवादस्य प्रवर्तकः आसीत्। चैतन्यदेवस्य मतानुसारीवैष्णवाः गौड़ीयसम्प्रदाय-इति नाम्ना प्रसिद्धाः। सम्प्रदायेस्मिन् तत्त्वत्रयं स्वीकृतम् -

1. परब्रह्म भगवान् ब्रजेन्द्रनन्दनः

2.जीवः

3. जगत् ।

चैतन्यचरितामृते प्राप्यते-

**कृष्णेर स्वरूप, आर शक्तित्रय-ज्ञान।**

**यार हय, तार नाहि कृष्णेते अज्ञान।।**[4]

अत्र ब्रह्म विशेषः शक्तिमान्सच्चिदानन्द अनन्त अचिन्त्यशक्ति-सम्पन्नःलीलाविलासी चेति स्वीकृतम् ।

सम्प्रदायेऽस्मिन् जीवः ब्रह्मणः तटस्यशक्तिः न तु स्वरूप शक्तिः। जीवस्य पृथगावस्थिति मोक्षावस्थायामपि विद्यते। जगतः सत्यतास्ति अनित्य रूपेण। ब्रह्मशक्तिः माया जगद्रूपेण परिणमते। एतेषां सम्वन्धः शक्तशक्तिमद्रुपः वर्तते। ब्रह्म शक्तिमान् जीवजगत् शक्तिरस्ति। जीवजगद्रूपशक्ति- शक्तिमद् ब्रह्मस्वरूपश्रीकृष्णयोः भेदोऽपि वर्तते अभेदश्च । भेदोऽयं अचिन्त्यः न तु स्वाभाविकमौपाधिकञ्च। अतः एतेषां भेदाभेदसम्वन्धः अचिन्त्यः भवति । परन्तु चैतन्यसम्प्रदाये मतमिदं न स्वीकृतम् । तेषां मते -

स्वमते तु अचिन्त्य भेदाभेदावेव अचिन्त्यशक्तिमयत्वादिति ।

अचिन्त्यभेदाभेदवादस्य चिन्तनमस्ति यत् सर्वशक्तिमान्पर-ब्रह्मब्रजेन्द्रनन्दनः प्रेमरूपीपञ्चमपुरुषार्थेन प्रतिष्ठितः। भगवतः कृपानुग्रहं प्राप्य मायारूपसंसारे तरति जीवः। भक्तिमार्गेन मोक्षः सम्भवति । परब्रह्मश्रीकृष्णस्य सामीप्य प्राप्तिरेव मोक्षः । अत्र त्रितत्त्वं स्वीकृतम् दृ परब्रह्मश्रीकृष्णः इति सम्वन्धतत्त्वम्, तस्य प्राप्तेः उपायः भक्ति एव अभिधेयतत्त्वम्, भक्त्या एकमेव उद्देश्यं कृष्णप्रेम हि प्रयोजनतत्त्वम् ।

भगवान् श्रीकृष्णचैतन्यदेवः गौडीयवैष्णवाचार्यजीवगोस्वामिना अचिन्त्यभेदाभेदवादं स्थापितवान्। श्रीमद्भागवतं ब्रह्मसूत्रस्यव्या-ख्यानरूपमिति चैतन्यदेवः मन्यते । यथा चैतन्यचरितामृते-

**भागवत, भारतशास्त्र, आगम, पुराण।**

**चैतन्य-कृष्ण-अवतारे प्रकट प्रमाण।।**[5]

अतः स किमपि ब्रह्मसूत्रभाष्यं न रचितवान्। श्रीपादवलदेव-विद्याभूषणः सर्वप्रथमं चैतन्यप्रणीताचिन्त्य-भेदाभेदवादस्य चिन्तन-माश्रित्य ब्रह्मसूत्रगोविन्दभाष्यं रचितवान् ।

श्रीपादवलदेवविद्याभूषणः सर्वप्रथमं चैतन्यप्रणीताचिन्त्यभेदाभेद-वादस्य चिन्तनमाश्रित्य ब्रह्मसूत्र गोविन्दभाष्यं रचितवान्। वलदेव-विद्याभूषणस्य जन्म अष्टादशशताब्धाः प्रारम्भे उत्कलप्रदेशस्य वालेश्वरमण्डलस्य रेमण्याः निकटे कस्मिन्नपि ग्रामे अभवत्। तत्र स व्याकरणन्यायादिशास्त्रानिवेदानध्ययनाय मैसूरक्षेत्रे गतवान्। तत्र कस्यापि माध्वगुरोः शिष्यत्वं गृहीत्वा पुरूषोत्तमक्षेत्रे गतवान् । तत्र स स्वपाण्डित्येन विद्वत्समाजं पराभूतं अकरोत्। तत् पश्चात्

श्रीनयनानन्दप्रभोः शिष्यस्य श्रीपादराधादामोदरस्य श्रीभागवतसन्दर्भे दार्शिनकसिद्धान्तानां वर्णनं श्रुत्वा तस्य चिन्तनस्य परिवर्तनम् जातम्। राधादामोदरदासात् भागवतशास्त्रस्य आद्योपान्तम् अधीत्य तस्य शिष्यम् अभवत्। माध्वसम्प्रदायस्य न केवलं चिन्तनम् आश्रमीयकषायवस्त्रमपि परित्यज्य विरक्तवैष्णववेशः ग्रहणमकरोत्। गुरुणा वलदेवं एकान्ती गोविन्ददासः इति नाम्ना अभिहितः। वलदेवस्य गुरुपरम्परा निम्नरूपा भवति यथा श्रीमन्नित्यानन्दप्रभुः ततः श्रीगौरीदासपण्डितः ततः श्रीहृदयचैतन्यदासः ततः श्रीश्यामानन्दप्रभुः ततः श्रीरसिकानन्दमुरारिः ततः श्रीनयनानन्दः ततः श्रीराधादामोदरदासः ततःश्रीबलदेवविद्याभूषणः इति।

तदनन्तरं वृन्दावनस्थश्रीगौडीयसम्प्रदायस्य प्रधानाचार्यः श्रीपाद विश्वनाथस्य समीपं गत्वा भागवतादि शास्त्रानाम् अध्ययनमकरोत् ।

तदा जयपुरे श्रीगोविन्ददेवस्य सेवा विषये समस्या आगच्छत् । औरङ्गजेवस्य पीडने गोविन्ददेवस्य विग्रहं जयपुरे आनयनानन्तरं श्रीगौडीयवैष्णवसम्प्रदायः सेवाकार्यमकरोत्, परन्तु रामानुजसम्प्रदायस्य पण्डिताः राज्ञः समीपे सेवा विषये आपत्तिम् अकुर्वन्। आक्षेपस्य कारणद्वयम् वर्तते। प्रथमं गौडीयसम्प्रदाये किमपि स्वतन्त्रभाष्यं नासीत्।अतः सम्प्रदायस्य अस्तित्वं नासीत् । द्वितीयम् वैष्णवाः प्रथमं गोविन्ददेवस्य ततः परं नारायणस्य सेवाकार्यमकुर्वन्। अतः न केवलं जयपुरे वृन्दावनेऽपि मन्दिरे सेवाकार्यात् दूरीभवति। श्रीपादविश्वनाथस्य निर्देशे जयपुरं गत्वा वलदेवः राजसभायां सर्वसम्प्रदायस्य पण्डितैः सह विचारमकरोत्। पण्डितैः तस्य युक्तितर्काः अस्वीकृताः। ततः स त्रिमासाभ्यन्तरे ब्रह्मसूत्रभाष्यस्य निर्माणाय प्रतीज्ञां कृतवान्। स निर्दिष्टसमयस्य प्राक् भाष्यं सम्पन्नमकरोत्। वलदेवः न केवलं भाष्यं विंशति ग्रन्थानपि रचितवान्। यथा -

तत्त्वसन्दर्भ-टीका , लघुभागवतामृतटीका, सिद्धान्तरत्न इत्यादयः।

अल्पसमये वलदेवविद्याभूषणः ब्रह्मसूत्रभाष्यं रचितवान्। श्रीगोविन्ददेवस्य आदेशानुसारं श्रीवलदेवः ब्रह्मसूत्रभाष्यम् अरचयत् इति लोकप्रसिद्धिः अस्ति। स्वभाष्यान्ते अपि भाष्यकारः उक्तवान् -

**विद्यारुपं भूषणं मे प्रदाय ख्यातिं निन्ये तेन यो मामुदारः ।**
**श्रीगोविन्दं स्वप्ननिर्दिष्ट-भाष्यो राधाबन्धुर्बन्धुरांगः स जीयात् ।।**[6]

अतः भाष्यं गोविन्दभाष्यं इति नाम्ना प्रसिद्धम्। भाष्यमिदम् अचिन्त्यभेदाभेदवादस्य धारकं वाहकं च भवति। भाष्यरचनाय जयपुरस्य राजा वलदेवं विद्याभूषणः इति उपाधिना विभूषितमकरोत्। किञ्चित्दिनान्तरं वलदेवः गोविन्दभाष्यस्य सूक्ष्मा इत्याख्या टीकापि रचितवान्। चीकासहितं ब्रह्मसूत्रभाष्यमदं भागवतम् अनुवर्तते।

श्रीचैतन्यदेवप्रणीतम् अचिन्त्यभेदाभेदसिद्धान्तं भगवतभक्तानां कृते गोविन्दभाष्ये चित्तानुग्राहीरूपेण सरलरूपेण च प्रस्तुतम्। गोविन्दभाष्यं पाठानन्तरमिदं निश्चितं जातं यत्, चैतन्यप्रणीतं सिद्धान्तं हि वर्तमानकाले ईश्वरानुग्रहप्राप्तये ग्रहणीयम्। चैतन्यदेवस्य सिद्धान्तमेव भाष्यरूपेण मुमुक्षुभक्तानां कृते भक्तिमार्गे प्रवेशपथम्। वर्तमानकाले भक्तियोगं हि मनुष्यानां मुक्तिकारणम्। अतः हि वैष्णवसम्प्रदायानां गुरुत्वम् अनस्वीकार्यम्। तत्र वलदेवेकृतगोविन्द-भाष्यं मुमुर्षुकृते महौषधम्।

तथ्यसूत्रः-

1 मुक्तिकोपनिषद् 1.29

2.चैतन्यचरितामृतः आदि.7.106

3.श्रीमद्भगवद्गीता 15.15

4. चैतन्यचरितामृतः आदि.2.96

5. चैतन्यचरितामृतः आदि.3.84

6.गोविन्दभाष्यम् -4.4.22

**सन्दर्भ ग्रन्थसूची-**


1. अग्रवाल, हंसराज. संस्कृतसाहित्य का इतिहास. चौखम्बा सुरभारती प्रकाशन. 1986.
2. आप्टे,शिवराम. संस्कृत-हिन्दी-कोश.राष्ट्रिय संस्कृतसंस्थान,1987.
3. उपाध्याय,बलदेव.संस्कृतवाङ्मय का बृहद् इतिहास. उत्तर प्रदेश संस्कृत संस्थान, 1998.
4. कीथ, ए बी. संस्कृतसाहित्य का इतिहास. मोतिलाल बनारसी दास, 1978.
5. गोस्वामी, भक्तिसिद्धान्तसरस्वती. वेदान्तसूत्रम्. सारस्वतगौडीयासन मिशन, 2014.
6. गोस्वामी, भक्तिसुहृद् परिव्राजक. श्रीश्रीचैतन्यचरितामृत. गौडीय मिशन, 2016.
7. घोष, जगदीशचन्द्र. श्रीगीता. प्रेसिडेन्सी लाइब्रेरी, 2003.
8. घोष, महेशचन्द्र. उपनिषद् . हरफ प्रकाशनी, 2000.
9. द्विवेदी,कपिलदेव.संस्कृतनिबन्धशतकम्.विश्वविद्यालय प्रकाशन, 2000.
10. नाथ, राधागोविन्द. गौडीय वैष्णव दर्शन. संस्कृत वुक डिपो, 2016.
11. परिव्राजक, श्रीरूपभागवत. श्रीमद्भागवतम्. गौडीय मिशन, 2010.